
# वार्षिक–पाठ्यक्रमः सत्रम्– 2023-24

## कक्षा –षष्ठी विषयः–संस्कृतम्



| क्र० | पाठ्यवस्तु | सहायकशैक्षिक–अनुदेशाः | अधिगम–उद्देश्याः | अधिगमसम्प्राप्तिः | गतिविधिः |
|---|---|---|---|---|---|
| 1. | प्रथमः पाठः - अकारान्त–पुल्लिङ्गः | चित्रमाध्यमेन शब्दपरिचयः - चषकः, सौचिकः, शुनकः इत्यादीनां प्रथमाविभक्तौ त्रिषु वचनेषु अभ्यासः। अभिनयमाध्यमेन सर्वनामपरिचयः – एतत्, तत्, किम् इति एतेषां पुल्लिङ्गे प्रथमाविभक्तौ त्रिषु वचनेषु अभ्यासः। चित्राधारितरिक्तस्थानपूर्तिः – तालः, भल्लूकः इत्यादिचित्राणां बालाः नामलेखनं करिष्यन्ति। पुनरावलोकनम्- वर्णमालायाः अभ्यासः। | • पुल्लिङ्गशब्दान् छात्राः जानीयुः, एतदर्थं शिक्षकः गतिविध्याधारितं शिक्षणं कुर्यात् । <br>• संज्ञासर्वनामशब्दानां परिचयः प्रदास्यति। <br>• वर्णसंयोजने वर्णविच्छेदे छात्रान् निपुणत्वं विधास्यति। | • पुल्लिङ्गशब्दान् सर्वनामशब्दान् जानन्ति। <br>• वर्णनिर्माणविधिं जानन्ति। <br>• संज्ञा–सर्वनामशब्दानाम् पृथक्करणे नैपुण्यं प्राप्नुवन्ति। | वर्णमालागीतम्-2 यूट्यूब–सहायतया शिक्षणीयम्। कमलं विकसति सुन्दर–सरसि..... <br>• http://youtu.be/vij97ix2JwY; |

| | | | | | |
|---|---|---|---|---|---|
| 2. | शब्दरूपपरिचयः क्रियापदपरिचयः | शब्दरूपाणि – बालकः, रामः, लता, जल, अभिनयमाध्यमेन क्रियापदपरिचयः - अस्, कृ, खेल्, पठ्, धाव्, हस् इत्यादीनां धातूनां लट्लकारे प्रथमपुरुषे त्रिषु वचनेषु अभ्यासः। वाक्यरचनाभ्यासः, अभ्यासकार्यम्। | • अकारान्त–आकारान्ताः विविध–पुंस्त्रीनपुंसकलिङ्गशब्दानाम् उदाहरणेन बोधः कारयेत्। यथा–नायकः, रजकः, कपोतः, कन्या वन, धन, इत्यादयः।<br>• धातुरूपाणि बोधनाय विविधक्रियानां हावभावमाध्यमेन बोधो कारयिष्यति। | • धातुरूपाणि त्रिषु वचनेषु जानन्ति। वाक्यनिर्माणे दक्षः भवति। | • https://youtu.be/MIIqt8CiRQis; |
| 3. | द्वितीयः पाठः- आकारान्त–स्त्रीलिङ्गः | चित्रमाध्यमेन शब्दपरिचयः - दोला, घटिका, चालिका, चटका इत्यादीनां प्रथमाविभक्तौ त्रिषु वचनेषु अभ्यासः। अभिनयमाध्यमेन सर्वनामपरिचयः – एतत्, तत्, किम् इति एतेषां स्त्रीलिङ्गे प्रथमाविभक्तौ त्रिषु वचनेषु अभ्यासः। | आकारान्ताः विविध–स्त्रीलिङ्गशब्दानाम् उदाहरणमाध्यमेन बोधः कारयिष्यति। यथा–वाचिका, कन्या, शिक्षिका इत्यादि। | स्त्रीलिङ्गशब्दरूपाणि सर्वनामशब्दरूपाणि तथा जानन्ति। | विविधवस्तुप्रदर्शनविधि द्वारा लिङ्गबोधः कारणीयः। |
| 4. | तृतीयः पाठः- अकारान्त– | चित्रमाध्यमेन शब्दपरिचयः - खनित्रम्, सूत्रम्, यानम्, करवस्त्रम्, फलम्, | नपुंसकलिङ्गशब्दान् छात्राः जानीयुः, एतदर्थं शिक्षकः | नपुंसकलिङ्गशब्द-रूपाणि सर्वनाम- | गतिविधयः – अस्ति, नास्ति, आम्, न, किम् |

| | | | | | |
|---|---|---|---|---|---|
| | नपुंसकलिङ्गः | भवनम् इत्यादीनां प्रथमाविभक्तौ त्रिषु वचनेषु अभ्यासः। अभिनयमाध्यमेन सर्वनामपरिचयः- तत्, एतत्, किम् इति नपुंसकलिङ्गे प्रथमाविभक्तौ त्रिषु वचनेषु अभ्यासः। धातुरूपाणि – अभिनयमाध्यमेन क्रियापदपरिचयः - पठ् (लट्, लृट्, लङ्- लकारेषु) वाक्यरचनाभ्यासः, अभ्यासकार्यम्। | गतिविध्याधारितं शिक्षणं कुर्यात् । | शब्दरूपाणि अव्ययशब्दान् च ज्ञात्वा प्रयोगे समर्थाः भवन्ति। | प्रश्नोत्तराभ्यासः। |
| 5. | चित्राधारिता वाक्यरचना | शिक्षकः चित्राधारिता वाक्यरचनायाः अभ्यासः कारयेत्। | तार्किक–चिन्तनं समस्या–समाधानम् कौशलान् शिक्षयेत्। | भाषायां लेखनकौशलस्य अभिवृद्धिः भवति। | शिक्षकः कमपि चित्रं स्वेच्छया निर्माणाय छात्रान् प्रेरयेत्। तमाधृत्य ते वाक्यानि रचयेयुः। |
| 6. | चतुर्थः पाठः - विद्यालयः | आदर्शवाचनम्, अनुवाचनम्, शब्दार्थज्ञानम्, अभ्यासकार्यम्। गतिविधयः –'मम परिचयः' इति विषये मम नाम ----। भवतः/ भवत्याः/ विद्यालयस्य/निवासस्थानस्य/जनकस्य नाम इत्यादीनि वाक्यानि वदेयुः। | विद्यार्थिनः भाषायाः वाचनकौशले दक्षाः भवेयुः। | स्वकीयं परिचयं विद्यालयस्य च परिचयं संस्कृतभाषायां वक्तुं समर्थाः भवन्ति। | सामूहिक–गतिविधिः – पाठ्यक्रमानन्तरं समयः शिष्टः स्यात्तर्हि संस्कृतकविताः यथा– मम माता देवता, चटका चटका रे चटका यूट्यूब–सहायतया शिक्षणीयम्, अनन्तरं ते स्वयमेव गायने कुशलाः |

| | | | | | |
|---|---|---|---|---|---|
| | | | | | भवन्ति। https://youtu.be/LzzzZDzGlgg |
| 7. | पञ्चमः पाठः– वृक्षाः | सस्वरगायनम्, शब्दार्थज्ञानम्, अभिनयपूर्वकं कण्ठस्थीकरणम्/लयाभ्यासः, अभ्यासकार्यम्। गतिविधिः छात्रान् वृक्षरोपणाय शिक्षकः प्रेरयेत्। ग्रीष्मकाले यदा पशु– पक्षिणः आतपात् त्रस्ताः भवन्ति। तदा वृक्षाः एव तेषाम् आश्रयः भवितुं शक्यः। छात्राः एतेन प्रेरणा संगृह्य वृक्षारोपणं कुर्युः। शब्दपरिचयः - इकारान्तः उकारान्तश्च। | छात्राः श्लोकानां शिक्षकानुगुणं सस्वरं श्लोकान् गायेयुः। अनन्तरं कण्ठस्थीकरणं च कुर्युः। | पर्यावरणसंरक्षणे वृक्षाणां महत्त्वं जानन्ति। श्लोकान् स्मरन्ति। | संस्कृतकविताः यथा– मम माता देवता, लिंक– https://youtu.be/9AK-VLzJl4Y चटका चटका रे चटका, https://youtu.be/3d-64p0pd04 वर्णमालागीतम्-1 यूट्यूब– सहायतया शिक्षणीयम्, अनन्तरं ते स्वयमेव गायने कुशलाः भविष्यन्ति। |

- सूचना : उपर्युक्तं सकलं पाठ्यक्रमं **15** सितम्बर **2023** पर्यन्तं समापनीयम्।
- मध्यावधिपरीक्षादृष्ट्या उपर्युक्तस्य सकलपाठ्यक्रमस्य पुनरावृत्तिः।
- प्रदत्तं सकलं पाठ्यक्रमं मूल्याङ्कनहेतोः वर्तते।

मध्यावधि परीक्षा

| क्र० | पाठपरिचयः | विषयवस्तु | | अधिगमसम्प्राप्तिः | |
|---|---|---|---|---|---|

| | | | | | |
|---|---|---|---|---|---|
| 8. | सप्तमः पाठः बकस्य प्रतीकारः | आदर्शवाचनम्, अनुवाचनम्, शब्दार्थज्ञानम्, अभ्यासकार्यम्। तत्समपदानाम् अभ्यासः - सियार-श्रृगालः, कौआ-काकः इत्यादयः। संख्या – 1 तः 20 पर्यन्तम्। एकतः चत्वारि पर्यन्तं त्रिषु लिङ्गेषु अभ्यासः। पञ्चतः आरभ्य सामान्यम्। गतिविधिः– शिक्षकः छात्रैः सह मिलित्वा द्वितीता–तृतीया–चतुर्थी–विभक्ति आधारिता कामपि गतिविधिं सम्पादयेत्। येन छात्राः उल्लिखित–विभक्तीनां सामान्यप्रयोगे दक्षाः भवेयुः। | छात्राः तार्किकचिन्तने क्षमाः भवेयुः। | रोचककथामाध्यमेन छात्राः अव्ययशब्दान् जानन्ति। गद्यविधायां पठनकौशलं च प्राप्नुवन्ति। छात्राः मातृभाषायाम् अन्यासु भाषासु च संख्यां जानन्ति। तस्य पुनरावर्तनं कारणीयम् | गतिविधिः– संख्यागीतम् यूट्यूब–सहायतया शिक्षणीयम्, एकम् एकम् आगच्छ–२। द्वे–द्वे स्वागतम्–२। त्रीणि–त्रीणि उपविश–२। चत्वारि–चत्वारि कुशलं किम्?–२ पञ्च–पञ्च कः विशेषः?–२ षड्–षड् कृपया वद–२ सप्त–सप्त दुग्धं पिब–२ अष्ट– अष्ट पुनर्मिलाम–२ नव–नव नमस्ते–२ दश–दश ओम्–ओम्–२ ॥ |
| 9. | अष्टमःपाठः– सूक्तिस्तबकः | पद्यपाठः, सस्वरगायनम्, शब्दार्थज्ञानम्, /लयाभ्यासः, अभ्यासकार्यम्। | | पद्यविधायां पठनकौशलं च प्राप्नुवन्ति। | |
| 10 | नवमः पाठः - क्रीडास्पर्धा | । आदर्शवाचनम्, अनुवाचनम्, ानम्, अभ्यास कार्यम्। | पञ्चमी–षष्ठीविभक्त्योः | कथायाः रसास्वादं कुर्वन्ति। | राम: / / लव: / सीता / पतिः / राम: |

<table>
<tr>
<td></td>
<td></td>
<td>• पञ्चमी- षष्ठीविभक्त्योः<br>।<br>• यथा, रामः-रामात्-रामस्य।<br>सीता-सीतायाः-सीतायाः<br>यथा - रामस्य पुत्रः लवः।<br>लवस्य पिता रामः। उमायाः<br>पतिः शिवः। शिवस्य पत्नी<br>उमा। एवमेव<br>अन्यपदानामपि<br>स्फोरकपत्रमाध्यमेन<br>अभ्यासः कारणीयः।<br><br>लृट्लकारे वाक्यप्रयोगः<br>परिवर्तनाभ्यासश्च<br>यथा - पठति-पठिष्यति। वदति-<br>वदिष्यति। चलति-चलिष्यति।<br>छात्रः हसति - छात्रः हसिष्यति।<br>बालकः पठति - बालकः<br>पठिष्यति। एवमेव<br>अन्यवाक्यानाम् अभ्यासः</td>
<td>त्रिषु लिङ्गेषु<br>शब्दानां प्रयोगे<br>समर्थाः भवेयुः।<br>धातूनां<br>लृट्लकारे<br>रूपाणि ज्ञात्वा<br>वाक्ये प्रयोगं<br>कुर्युः।</td>
<td>पञ्चमीविभक्तौ<br>षष्ठीविभक्तौ च<br>त्रिषु लिङ्गेषु<br>शब्दानां प्रयोगे<br>समर्थाः भवन्ति।<br>धातूनां लृट्लकारे<br>रूपाणि ज्ञात्वा<br>वाक्ये प्रयोगं<br>कुर्वन्ति।</td>
<td>
<table>
<tr><td>शिवः</td><td>पुत्रः</td><td>गणेशः</td><td>उमा</td><td></td><td>शिवः</td><td></td></tr>
<tr><td>दुष्यन्तः</td><td></td><td>भरतः</td><td>देवकी</td><td></td><td>वसुदेवः</td><td></td></tr>
<tr><td>वसुदेवः</td><td></td><td>कृष्णः</td><td>कैकेयी</td><td></td><td>दशरथः</td><td></td></tr>
<tr><td>दशरथः</td><td>पिता</td><td>रामः</td><td>गान्धारी</td><td></td><td>धृतराष्ट्रः</td><td></td></tr>
<tr><td>रावणः</td><td></td><td>मेघनादः</td><td>मन्दोदरी</td><td>पत्नी</td><td>रावणः</td><td></td></tr>
</table>
शिक्षकः छात्रान् पृथक् पृथक् पित्रा सह पुत्रेण सह च सम्बध्य इमान्शब्दान् अन्यानपि शब्दान् पृच्छेत्।
</td>
</tr>
</table>

| | | | | | |
|---|---|---|---|---|---|
| | | कारणीयः।<br>अव्ययानि – अपि, च, एव, वा, न, पुनः। | | | |
| **11.** | द्वादश पाठः दशमः त्वमसि | • आदर्शवाचनम्, अनुवाचनम्, शब्दार्थज्ञानम्, अभ्यासकार्यम्।<br>एकपदेन पूर्णवाक्येन प्रश्नानाम् अभ्यासः कारणीयः।<br>बहुविकल्पात्मक–प्रश्नानां चर्चा छात्रैः सह करणीया। | छात्राः तार्किकचिन्तने क्षमाः भवेयुः।<br>समस्यासमाधान–कौशले दक्षाः भवेयुः। | समस्यासमाधान कौशले दक्षाः भवन्ति। तार्किक–चिन्तने दक्षाः भवन्ति। | कक्षायां छात्राः पाठप्रदत्तां गतिविधिं सम्पादयेयुः। |
| **12.** | त्रयोदशः पाठः विमानयानं रचयाम | सस्वरगायनम्, शब्दार्थज्ञानम्, अभिनयपूर्वकं कण्ठस्थीकरणम्/लयाभ्यासः, अभ्यासकार्यम्।<br>लङ्लकारे परिवर्तनाभ्यासः वाक्यप्रयोगश्च।<br>पठति-अपठत्, लिखति-अलिखत्, गच्छति-अगच्छत्।बालकः गृहं <u>गच्छति</u>। - | कण्ठस्थीकरणे दक्षाः भवेयुः। | सस्वरगायनपूर्वकं पद्यपाठे समर्थाः भवन्ति।<br>इकारान्तस्य उकारान्तस्य च शब्दानां प्रयोगः पठ्-लिख्-प्रभृतिक्रियारूपैः सह कर्तुं समर्थाः | समूहाधारित–गतिविधिः– छात्राः अपशिष्ट–कर्गदेन विमानं रचयेयुः। पाठे आगतानि अव्ययपदानि प्रत्येकं विमाने समूहानुसारं सर्वे छात्राः लिखेयुः। |

| | | | | | |
|---|---|---|---|---|---|
| | | बालकः गृहं अगच्छत्। | | भवन्ति। | |
| • सूचना : उपर्युक्तं सकलं पाठ्यक्रमं **31** जनवरी **2024** पर्यन्तं समापनीयम्।<br>• वार्षिक–परीक्षादृष्ट्या उपर्युक्तस्य सकलपाठ्यक्रमस्य पुनरावृत्तिः।<br>• प्रदत्तं सकलं पाठ्यक्रमं मूल्याङ्कनहेतोः वर्तते।<br>• पाठ्यपुस्तकम् – रुचिरा (प्रथमः भागः) | | | | | |
| वार्षिक– परीक्षा | | | | | |